## पञ्चमाध्यायस्य चतुर्थः पादः

### पादशतस्य सङ्ख्यादेर्वीप्सायां वुन्लोपश्च । (१/२०७३)

[1]पादशतान्तस्य सङ्ख्यादेः प्रातिपदिकस्य वीप्सायां द्योत्यायां वुन् प्रत्ययो भवति । तत्सन्नियोगेन चान्तस्य लोपो भवति । यस्येति (६.४.१४८/३११)[2] लोपेनैव सिद्धे [5]पुनर्वचनमनैमित्तिकार्थम् । यस्येति[4] लोपः परनिमित्तकः । तस्य स्थानिवद्भावात् 'पादः पत्' (६.४.१३०/४१४) इति पद्भावो न स्यात् । अस्य त्वनैमित्तिकत्वान् न [5]स्थानिवत्त्वम् । द्वौ द्वौ पादौ ददाति द्विपदिकां ददाति[6] । द्वे द्वे शते ददाति द्विशतिकां ददाति । तद्धितार्थ (२.१.५१/७२८) इति [7]समासः । ततः प्रत्ययः । स्वभावाच्च वुन्प्रत्ययान्तं स्त्रियामेव वर्तते । [8]पादशतस्य इति किम् ? द्वौ द्वौ माषौ ददाति । सङ्ख्यादेः इति किम्? [9]पादं पादं ददाति । वीप्सायाम् इति किम् ? द्वौ पादौ ददाति । द्वे शते ददाति । पादशतग्रहणमनर्थकम्, अन्यत्रापि दर्शनात् । द्विमोदकिकां ददाति । त्रिमोदकिकां ददाति ॥

### दण्डव्यवसर्गयोश्च । (२/२०७४)

[10]दमनं दण्डः । दानं व्यवसर्गः । दण्डव्यवसर्गयोः गम्यमानयोः पादशतान्तस्य प्रातिपदिकस्य सङ्ख्यादेः वुन्प्रत्ययो भवति, [11]अन्तलोपश्च । अवीप्सार्थोऽयमारम्भः । द्वौ पादौ दण्डितः द्विपदिकां दण्डितः । द्वौ पादौ व्यवसृजति द्विपदिकां व्यवसृजति । द्विशतिकां[12] दण्डितः । त्रिशतिकाम्[13] । द्विशतिकां व्यवसृजति । त्रिशतिकाम्[14] ॥

### स्थूलादिभ्यः प्रकारवचने कन् । (३/२०७८)

स्थूलादिभ्यः[15] [16]प्रकारवचने द्योत्ये कन्प्रत्ययो भवति । जातीयरः (५.३.६९/२०२४) अपवादः । प्रकारो विशेषः । स्थूलप्रकारः स्थूलकः । अणुकः । माषकः[17] ।

[६२१] कन्प्रकरणे चञ्चद्बृहतोरुपसङ्ख्यानम् । (म.भा.२.४३०)

चञ्चत्प्रकारः चञ्चत्कः । बृहत्कः । चञ्चद्बृहयोः इति केचित् पठन्ति । तेषां चञ्चकः, [18]बृहकः [19]इति उदाहरणं [20]द्रष्टव्यम् ।

स्थूल । अणु । माष । इषु । 'कृष्ण तिलेषु' (ग.सू. १३७) । 'यव व्रीहिषु' (ग.सू.१३८) । '[21]पाद्यकालावदाताः सुरायाम्' (ग.सू.१३९) । 'गोमूत्र आच्छादने' (ग.सू.१४०) । 'सुराया अहौ' (ग.सू.१४१) । 'जीर्ण शालिषु' (ग.सू. १४२) । 'पत्रमूले समस्तव्यस्ते' (ग.सू.१४३) । कुमारीपुत्र । कुमार । श्वशुर । मणि । इति स्थूलादिः ॥

---

1. पादशतशब्दान्तस्य क. 2. इति इत्यधिकम् क, इति लोपो न भवति ड. 3. पुनर्लोपवचनम् ड. 4. च इति इत्यधिकम् क, हि इत्यधिकम् ड. 5. स्थानिवत्त्वं नास्ति ड. 6. त्रिशतिकां ददाति इत्यधिकम् ह. 7. समासे कृते ड. 8. पादशब्दस्य ह. 9. पादौ पादौ ददाति क. ड. 10. दण्डनं ड. 11. अन्त नास्ति ड. 12. त्रिपदिकां इत्यधिकम् ड. 13. दण्डितः इत्यधिकम् ह. 14. व्यवसृजति इत्यधिकम् क. ह. 15. प्रातिपदिकेभ्यः इत्यधिकम् ब. ड. फ. ह. 16. प्रकारे ह. 17. इषुकः इत्यधिकम् क. ह. 18. बृहकः नास्ति क. 19. इषुपञ्चकः ङ. 20. द्रष्टव्यम् नास्ति ग. 21. इक्षुतिल इत्यधिकम् ब. ड. फ. ह.